National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(59): 210-211
© 2025 NJHSR
www.sanskritarticle.com

**Dr.S. Murali**
Asst.Prof.in Jyotisha,
Madras Sanskrit College,
Chennai-04

**Correspondence:**
**Dr.S. Murali**
Asst.Prof.in Jyotisha,
Madras Sanskrit College,
Chennai-04

# ज्योतिषशास्त्रस्य जीवन्तपरम्परा- ज्ञानं विज्ञानञ्च

**Dr. S. Murali**

त्रिस्कन्धात्मके ज्योतिश्शास्त्रे ज्ञानविज्ञानविषयाः बहवः वर्तन्ते। बहुविख्यातेषु विज्ञानसंस्थासु वैज्ञानिकैः इदानीं क्रियमाणाः विज्ञानविचाराः वेदकालेष्वेव अस्माकं शास्त्रेषु ऋषिभिः विचारिताः वर्तन्ते। यथा शल्यचिकित्सा, पुष्पकविमानम्, योगशास्त्रम्, खगोलविचारः, ग्रहफलानि इत्यादयः। एतेषु त्रिस्कन्धात्मकं ज्योतिषशास्त्रम् विज्ञानशास्त्रेण नितरां सम्बद्धं वर्तते इति नारदसंहितायां विद्यमानम्

**अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलम्**
**प्रत्यक्षं ज्योतिषं शास्त्रं साक्षिणौ चन्द्रभास्करौ॥**[1]

वचनं दृढीकरोति। ज्योतिषशास्त्रे बहवः ज्ञानविज्ञानविषयाः वर्तन्ते। बृहज्जातकस्य मङ्गलश्लोके "मूर्तित्वे परिकल्पितः शशभृतः" इति सूर्यं वदन्ति। अनेन प्रमाणेन चन्द्रः मूर्तिहीनः तस्य मूर्तिकारणं सूर्यः इति ज्ञानं प्राप्नुमः। अत्र विज्ञानकारणमस्त्येवं चन्द्रः सलिलमयः प्रकाशशून्यश्च अतः जले पतितां सूर्यकिरणानं प्रतिबिम्बः भूतले पतति इति। तदुक्तं संहितायाम्

**सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशम्**
**क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः॥**[2]

सहस्रवर्षेभ्यः प्राक् अस्मत् शास्त्रेषु विचारितविषयाः इदानीम् विज्ञाने विचार्यत्वेन गवेषणीयत्वेन च वर्तन्ते इत्यनेन अस्माकं शास्त्रमहत्वं ज्ञातुं प्रभवामः। मेषादि द्वादशराशीणां क्रूरसौम्य, पुरुषवनिते इत्यादि संज्ञाः कल्पिताः वर्तन्ते। अस्य प्रयोजनचिन्तनावसरे,

**ओजे पुरुषाः ज्ञेयाः सौम्याः स्त्रीसंज्ञकाः क्रमाद्युग्मे।**
**उग्रेषूग्राः सौम्याः सौम्य युग्मेषु भवनेषु॥** इति।

इदं ज्ञानम् इदानीन्तन वैद्यशास्त्रे महदुपकारङ्करोति। गर्भाधनलग्नाधारेण शिशुलिङ्गचिन्तनं तथैव मनोवैज्ञानिकरीत्या स्वाभावचिन्तनार्थञ्च सहकरोति।एवमेव द्वादशराशयः द्वादश अङ्गानि भवन्ति। तद्यथा

**कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासोभृतो**
**वस्तिर्व्यञ्जनमूरुजानुयुगले जङ्घे ततोङ्घ्रिद्वयम्॥**[3]

अस्य प्रयोजनन्तु

**कालनरस्य अवयवान् कल्पयेत् प्रसवकाले**
**सदसत्ग्रहसंयोगात्पुष्टान्सोपद्रवांश्चापि॥**[4] इति

अनेन प्रसवकाले एव शिशोः क्लेशं ज्ञात्वा तदनुगुनचिन्तने दत्तचित्ताः भवितुं शक्नुमः। ग्रहाणाङ्कारकत्वकथानावसरे “कालात्मा दिनकृन्मनस्तुहिमगुः” इति आचार्याः वदन्ति इदानीन्तन वैज्ञानिकैः अङ्गीकृतं वर्तते यत् चन्द्रस्य ह्रासवृध्यनुसारं मनसः अपि बलाबलं भवति इति। उन्मत्तानां स्वभावविकारः कृष्णपक्षे अधिकः भवतीति विषयः अत्र प्रत्यक्षप्रमाणम्। “पीडिते ग्रहे देहवतोऽपि तदङ्गभावात्मगुणपीडनं वक्तव्यं पुष्टे पुष्टिः” इत्यादि वचनान्यपि अत्र प्रमाणानि।

ग्रहाणां स्नाय्वादिसारत्वं बृहजातके वर्तते। "स्नाय्वस्थ्यसृक्त्वगथ शुक्रवसे च मज्जा मन्दार्कचन्द्रबुधशुक्रसुरेज्यभौमाः" अनेन ज्ञानेन ग्रहाणां बलाबलं ज्ञात्वा तदनुसारं वैज्ञानिकरीत्या निवारणोपायान्वेषणे दत्तचित्ताः भवामः। बृहज्जातकस्य वियोनिजन्माध्याये वृक्षाणां आधिपत्यनिरूपणावसरे एवं वदन्ति

**अन्तः साराञ्जनयति रविर्दुभगान्सूर्यसूनुः**
**क्षीरोपेतांस्तुहिनकिरणः कण्ठकाढ्यांश्च भौमः।**
**वागीशज्ञौ सफलविफलान् पुष्पवृक्षांश्च शुक्रः**
**स्निग्धानिन्दुः कटुकविटपान् भूमिपुत्रश्च भूयः॥**[5] इति

अनेन ज्ञानेन क्षेत्रे विद्यमान पुष्पवृक्षः पुष्पभाक् वा उत न एवं फलवृक्षः फलं ददाति उत न इति विज्ञानं भवति।

एवमेव निषेकाध्याये स्त्रीणां प्रतिमास आर्तवप्रतिपादनावसरे

**कुजेन्दुहेतु प्रतिमासमार्तवं गते तु पीडर्क्षमनुष्णदीधितौ।**
**अतोन्यथास्थे शुभग्रहेक्षिते नरेण संय्योगमुपैति कामिनी॥**[6] इति उपदिशन्ति।

कुजेन्दुस्थित्यनुसारं आर्तवज्ञानमिति ज्ञानम्। सामान्यतः शरीरस्थ उष्णरक्तयोः कारणेनैव स्त्रीणाम् आर्त्वमिति इदानीन्तन विज्ञानवचनम्। एवञ्च श्लोकेविद्यमान कामिनी इति पदस्य दशाध्याय्यां कटपयादि संख्याद्वारा ५१ वयः इति प्रकल्प्य तावद्वर्षं स्त्री कामिनी एवं आर्तववती भवति इति विज्ञानं सूचयन्ति। अपिच बृहज्जातकस्य निषेकाध्याये गर्भस्थशिशोः क्रमशः अहिवृद्धिः कथं भवति सूचयन्ति। तद्यथा

**कललघनाङ्कुरास्थिचर्माङ्गजचेतनताः**
**सितकुजजीवसूर्यचन्द्रार्किबुधाः परतः॥**[7]

गर्भाधानात् परं प्रथममासे शुक्लशोणितयोः मिश्रितावस्था, द्वितीये तस्य घनावस्था, तृतीयेमासि अङ्कुरः हस्ताद्यवयवानां उत्पत्तिः, चतुर्थे मासि अस्थ्युद्भवः, पञ्चमे चर्म, षष्ठे लोमानां प्रादुर्भावः, सप्तमे चेतना इति क्रमम् उपदिशन्ति। अपि च सारावल्यां मैथुने विद्यमान मनोभावानुगुणमेव सन्तानस्य स्वभावः इति जननात् प्रागेव शिशुमधिकृत्य चिन्तितुं शक्यते इति ज्ञापयति। तद्यथा "मिथुनस्य मनोभावो यादृङ्मदालस्यतो सौम्यस्तत्तुल्यगुणं सुतं समाधत्ते" इति। आयुर्दायाध्याये प्राणिनां आयुप्रमाणं निरूपयन्ति।

**समाः षष्टिर्द्विघ्नी मनुजकरिणां पञ्चनिशा**
**हयानां द्वात्रिंशत्खरकरभयोः पञ्चककृतिः।**
**विरूपा साऽप्यायुर्वृषमहिषयोर्द्वादशशुनां**
**स्मृतं छागादीनां दशकसहिताः षट् च परमम्॥**[8]

अस्मिन् महत्विज्ञानमस्ति इति प्रत्यक्षमेव। आर्यभटीये भूस्वरूपप्रतिपादकं वाक्यमस्त्येवम्-

**वृत्तभपञ्जरमध्ये कक्ष्यापरिवेष्टितः खमध्यगतः।**
**मृज्जलशिखिवायुमयो भूगोलस्सर्वतो वृत्तः॥**[9]

भूमिः गोलाकारः इति अयं श्लोकः निरूपयति। अयं विषयः वैज्ञानिकैः अधुनापि प्रतिपाद्यमानः वर्तते। भूमेः आकर्षणशक्तिप्रतिपादकवाक्यमस्ति एवम्-

**मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति।**
**बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम्॥**[10]

तथैव परिवेषसवरूपं वर्णयन्ति वराहमिहिराचार्याः बृहत्संहितायाम्-
सम्मूर्च्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः

**नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः॥**[11]

आकाशे राराजमाणः परिवेषः कथम् उद्भवति इति ज्ञानं विज्ञानात्मकण् भावति। तथैव वृष्टिज्ञानं कथं भवेत् इति बृहत्संहितायां प्रतिपादितं वर्तते एवम्-

**वल्लीनां गगनतलोन्मुखाः प्रवलाः स्नायन्ते यदि जलपांशुभिर्विहङ्गाः।**
**सेवन्ते यदि सरीसृपास्तृणाग्राण्यासन्नो भवति तदा जलस्य पातः॥**[12]

**शक्रचापपरिघप्रतिसूर्या रोहितोऽथ तडितः परिवेषः।**
**उद्गमास्तसमये यदि भानोरादिशेत् प्रचुरमम्बु तादाशु॥**[13]

इतोपि बहूनि वृष्टिलक्षणानि संहितायां प्रतिपादितानि वर्तन्ते। एवं कालविषयः, वास्तुविषयः, खगोलविशयः, वैद्यविषयः, वृष्टिविषयः इति बहवः ज्ञानवैज्ञानिकविषयाः त्रिस्कन्धात्मके ज्योतिषे प्रतिपादिताः इति वर्तन्ते॥

**संदर्भ ग्रन्थ**

[1]नारदसंहिता
[2]बृहत्संहिता
[3]बृहज्जातकम्
[4]सारावली
[5]बृहज्जातकम्
[6]बृहज्जातकम्
[7]बृहज्जातकम्
[8]बृहज्जातकम्
[9]आर्यभटीयम्
[10]आर्यभटीयम्
[11]बृहत्संहिता
[12]बृहत्संहिता
[13]बृहत्संहिता